# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ५१

तत्र तां रजनीमुष्य गोमत्यां रघुनन्दनः ।
प्रभाते पुनरुत्थाय लक्ष्मणः प्रययौ तदा ॥ १॥

ततोऽर्धदिवसे प्राप्ते प्रविवेश महारथः ।
अयोध्यां रत्नसम्पूर्णां हृष्टपुष्टजनावृताम् ॥ २॥

सौमित्रिस्तु परं दैन्यं जगाम सुमहामतिः ।
रामपादौ समासाद्य वक्ष्यामि किमहं गतः ॥ ३॥

तस्यैवं चिन्तयानस्य भवनं शशिसंनिभम् ।
राजस्य परमोदारं पुरस्तात्समदृश्यत ॥ ४॥

राज्ञस्तु भवनद्वारि सोऽवतीर्य नरोत्तमः ।
अवान्मुखो दीनमनाः प्राविवेशानिवारितः ॥ ५॥

स दृष्ट्वा राघवं दीनमासीनं परमासने ।
नेत्राभ्यामश्रुपूर्णाभ्यां ददर्शाग्रजमग्रतः ॥ ६॥

जग्राह चरणौ तस्य लक्ष्मणो दीनचेतनः ।
उवाच दीनया वाचा प्राञ्जलिः सुसमाहितः ॥ ७॥

आर्यस्याज्ञां पुरस्कृत्य विसृज्य जनकात्मजाम् ।
गङ्गातीरे यथोद्दिष्टे वाल्मीकेराश्रमे शुभे ।
पुनरस्म्यागतो वीर पादमूलमुपासितुम् ॥ ८॥

मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी ।
त्वद्विधा न हि शोचन्ति सत्त्ववन्तो मनस्विनः ॥ ९॥

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ १०॥

शक्तस्त्वमात्मनात्मानं विजेतुं मनसैव हि ।
लोकान्सर्वांश्च काकुत्स्थ किं पुनर्दुःखमीदृशम् ॥ ११॥

नेदृशेषु विमुह्यन्ति त्वद्विधाः पुरुषर्षभाः ।
यदर्थं मैथिली त्यक्ता अपवादभयान्नृप ॥ १२॥

स त्वं पुरुषशार्दूल धैर्येण सुसमाहितः ।
त्यजेमां दुर्बलां बुद्धिं सन्तापं मा कुरुष्व ह ॥ १३॥

एवमुक्तस्तु काकुत्स्थो लक्ष्मणेन महात्मना ।
उवाच परया प्रीत्या सौमित्रिं मित्रवत्सलम् ॥ १४॥

एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण ।
परितोषश्च मे वीर मम कार्यानुशासने ॥ १५॥

निर्वृतिश्च कृता सौम्य सन्तापश्च निराकृतः ।
भवद्वाक्यैः सुमधुरैरनुनीतोऽस्मि लक्ष्मण ॥ १६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com